मुद्रक : हिन्दी प्रिंटिंग प्रेस, क्वींस रोड, दिल्ली।

सान्वसद्राः

वण्चायां] [illegible]त्रम् ।

त्रम् ॥ "तत् [illegible] विद्महे, महादेवाय धीमहि,
रुद्रः प्रचोदयात्" ॥ ३ ॥ ऋषभ उवाच ॥ नमस्कृत्या-
महादेवं विश्वव्यापिनमीश्वरम् । वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं
नृणाम् ॥ १ ॥ शुचौ देशे समासीनो यथावत्कल्पितासनः ।
जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम् ॥ २ ॥ हृत्पुण्डरी-
कान्तरसन्निविष्टं स्वतेजसा व्याप्तनभोऽवकाशम् । अतीन्द्रियं
सूक्ष्ममनन्तमाद्यं ध्यायेत्परानन्दमयं महेशम् ॥ ३ ॥ ध्याना-
वधूताखिलकर्मबन्धश्चिरं चिदानन्दनिमग्नचेताः । षडक्षरन्यास-
समाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥ ४ ॥ मां पातु
देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे । यन्नाम दिव्यं
वरमन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥ ५ ॥ सर्वत्र मां
रक्षतु विश्वमूर्तिर्ज्योतिर्मयानन्दघनश्चिदात्मा । अणोरणीयानुरु-
शक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥ ६ ॥ यो भूस्वरू-
पेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः । योऽपां
[illegible] करोति सञ्जीवनं सोऽवतु मां जलेभ्यः ॥ ७ ॥
[illegible] भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ।
[illegible] मां दवाग्नेर्वात्यादिभीतेर्निखिलाच्च तापात् ।
[illegible] [illegible]पेण [illegible] प्राणादिभिः सोऽवतु मां
[illegible] [illegible]मरूपो [illegible]काशो ह्याकाशरूपेण करोति
[illegible] ॥ यः काल[illegible]भयाच्च सोऽव्यात् दिवा[illegible]
[illegible] । निशा[illegible] वनस्पतीशो यो वा मनः सोऽ-
[illegible] ॥ १० ॥ यो वेद नाम व्यवहारभोक्ता जीवस्त्री-
[illegible]साक्षी । स पातु [illegible]फलप्रदो मां मलाप्यविश्वं ।

प्रदातव्यं न देयं परदीक्षिते । ... ग्रन्थो दावि-
चार्यं सर्वथा क्वचित् । अस्यैव स्मृतमात्रस्य ... नश्यन्ति
शि: ॥ गुह्यका यातुधानाश्च वेताला राक्षसादयः । डाकि-
श्च पिशाचाश्च क्रूरसत्वाश्च पूतनाः ॥ नश्यन्ति सर्वे पठित-
त्रिस्यास्य प्रभावतः । खेचरी भूचरी चैव डाकिनी शाकिनी
॥ ॥ ये चान्ये बहुधा भूता दुष्टसत्त्वा भयानकाः । व्याधि-
र्भिक्षदौर्भाग्यमारीमोहविषादयः ॥ गजव्याघ्रादयो भीताः
यन्ते दिशो दश । सर्वे दुष्टाः प्रणश्यन्ति चेत्याज्ञा पार-
री ॥ इति श्रीललितस्वच्छन्दे बहुरूपगर्भस्तोत्र-
म: सम्पूर्णः ॥

अथ साम्बसदाशिवकवचस्तोत्रम् ॥

अस्य श्रीसाम्बसदाशिवकवचराजस्य, कपभयो-
गीश्वर ऋषिः, अनुष्टुप्छन्दः श्रीसाम्बसदाशिव
देवता [illegible] बीजं, नमः शक्तिः, शिवायेति कीलकं,
[illegible] शिवप्रीत्यर्थे पाठे विनियोगः ॥ ॐ अ-
[illegible] तर्जनीभ्यां नमः, मः मध्यमाभ्यां नमः, शि-
[illegible] नमः, वा कनिष्ठिकाभ्यां नमः, य करतलकर-
[illegible] ॥ ॐ हृदयाय नमः, न शिरसे स्वाहा, म
[illegible] शि कवचाय हुँ, वा नेत्राभ्यां वौषट्,
[illegible] । प्राणायामः ॥ ध्यानं । ध्यायेन्नित्यं मह-
[illegible] [illegible] कल्पोज्ज्वलाङ्गं परशुमृग-
[illegible] प्रसन्नम् । पद्मासीनं समन्तात् स्तुतममरगणैर्व्या-
[illegible] विश्वबन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रि-

सकयज्वमूर्तिः ॥ ११ ॥ प्रदीप्तविद्युत्कनकावभासो विद्यावरा-
भीतिकुठारपाणिः । चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं
रक्षतु मामजस्रम् ॥ १२ ॥ कुठारवेदाङ्कुशपाशशूलकपालढक्का-
क्षगुणान्ददानः । चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादऽघोरो
दिशि दक्षिणस्याम् ॥ १३ ॥ कुन्देन्दुशङ्खस्फटिकावभासो वेदा-
क्षमालावरदाभयाङ्कः । त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योविजातोऽ-
वतु मां प्रतीच्याम् ॥ १४ ॥ वराक्षमालाभयटङ्कहस्तः सरोज-
किञ्जल्कसमानवर्णः । त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां
दिशि वामदेवः ॥ १५ ॥ वेदाभयेष्टाङ्कुशपाशटङ्ककपालढक्का-
क्षत्रिशूलपाणिः । सितद्युतिः पञ्चमुखोऽवतान्मामीशान ऊर्ध्वं
परमप्रकाशः ॥ १६ ॥ मूर्धानमव्यान्मम चन्द्रमौलिर्भालं ममा-
व्यादऽथ भालनेत्रः । नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा
रक्षतु विश्वनाथः ॥ १७ ॥ पायाच्छ्रुती मे श्रुतिगीतकीर्तिः
कपोलमव्यात्सततं कपाली । वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां
सदा रक्षतु वेदजिह्वः ॥ [illegible] ॥ कण्ठं गिरीशोऽवतु नीलकण्ठः
स्कन्दौ वृषस्कन्ध[illegible] ॥ [illegible] । स्तनद्वयं पातु सदा महेशः
पार्श्वद्वयं मे [illegible] ॥ १९ ॥ भुजद्वयं पातु भुजङ्ग-
धारी पाणिद्वयं [illegible] पाणिः । दोर्मूलमव्यान्मम धर्म-
बाहुर्वक्षःस्थलं [illegible]ऽव्यात् ॥ २० ॥ ममोदरं पातु
गिरीन्द्रधन्वा म[illegible] मदनान्तकारी । हेरम्बतातो मम
पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ॥ २१ ॥ गुह्यं हरो
रक्षतु वासुकीशः पृष्ठं ममाव्याद्[illegible]पगेशः । ऊरुद्वयं पातु कुबे-
[illegible]ो जानुद्वये मे जगदीश्वरोऽव्यात् ॥ २२ ॥ जङ्घाद्वयं

भुजङ्गकेतुरव्यात्पादौ ममाव्यात्सुरवन्द्यपादः । पायान्ममान्तः-
करणं परात्मा सर्वाङ्गमव्यान्मम सर्वगुप्तः ॥ २३ ॥ महेश्वरः
पातु दिनाद्ययामे मां मध्ययामेऽवतु वामदेवः । त्रिलोचनः
पातु तृतीययामे वृषध्वजः पातु दिनान्तयामे ॥ २४ ॥ पाया-
न्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु मां निशीथे । गौरी-
पतिः पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम् ॥ २५ ॥
अन्तःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु बहिःस्थितं
माम् । तदन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां सम-
न्तात् ॥ २६ ॥ तिष्ठन्तमव्याद्भुवनैकनाथः पायाद्व्रजन्तं प्रमथा-
धिनाथः । वेदान्तवेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवः
शयानम् ॥ २७ ॥ मार्गेषु मां रक्षतु नीलकण्ठः शैलादिदुर्गेषु
पुरत्रयारिः । अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदार-
शक्तिः ॥ २८ ॥ [illegible]न्तकालोग्रपटुप्रकोपस्फुटाट्टहासोच्चलि-
ताण्डकोशः । घोरारि[illegible]र्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः
॥ २९ ॥ [illegible]हयवत्सहस्रलक्षायुतकोटिभीषणम् ।
अक्षौहिणी[illegible]तायिनां छिन्द्यान्मृडो घोरकुठारधारया
॥ ३० ॥ [illegible]ज्वलनार्चिर्ज्वलत्त्रिशूलं त्रिपुरान्त-
कस्य । शा[illegible]दिहिंस्रान्सन्त्रासयत्वीशधनुः पिनाकः
॥ ३१ ॥ [illegible]शकुनदुर्गमदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदु-
र्यशांसि । उ[illegible]रविषभीतिमसद्ग्रहार्तिं व्याधींश्च नाशयतु
मे जगतामधी[illegible] ॥ ३२ ॥ ॐ नमो भगवते सदाशिवाय
[illegible] सर्वयन्त्राधिष्ठिताय सर्वतन्त्रस्वरूपाय सर्वमन्त्र-
[illegible]य स[illegible]राय ब्रह्मरुद्रावतारिणे नीलकण्ठाय पार्व-

सकयज्वमूर्तिः ॥ ११ ॥ प्रदीप्तविद्युत्कनकावभासो विद्यावरा-
भीतिकुठारपाणिः । चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं
रक्षतु मामजस्रम् ॥ १२ ॥ कुठारवेदाङ्कुशपाशशूलकपालढक्का-
क्षगुणान्ददानः । चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो
दिशि दक्षिणस्याम् ॥ १३ ॥ कुन्देन्दुशङ्खस्फटिकावभासो वेदा-
क्षमालावरदाभयाङ्कः । त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातो-
ऽवतु मां प्रतीच्याम् ॥ १४ ॥ वराक्षमालाभयटङ्कहस्तः सरोज-
किञ्जल्कसमानवर्णः । त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां
दिशि वामदेवः ॥ १५ ॥ वेदाभयेष्टाङ्कुशपाशटङ्ककपालढक्का-
क्षत्रिशूलपाणिः । सितद्युतिः पञ्चमुखोऽवतान्मामीशान ऊर्ध्व-
परमप्रकाशः ॥ १६ ॥ मूर्धानमव्यान्मम चन्द्रमौलिर्भालं ममा-
व्यादथ भालनेत्रः । नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा
रक्षतु विश्वनाथः ॥ १७ ॥ पायाच्छ्रुती मे श्रुतिगीतकीर्तिः
कपोलमव्यात्सततं कपाली । वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां
सदा रक्षतु वेदजिह्वः ॥ १८ ॥ कण्ठं गिरीशोऽवतु नीलकण्ठः
स्कन्धौ वृषस्कन्ध[illegible] । स्तनद्वयं पातु सदा महेशः
पार्श्वद्वयं मे [illegible] ॥ १९ ॥ भुजद्वयं पातु भुजङ्ग-
धारी पाणिद्वयं [illegible]पाणिः । दोर्मूलमव्यान्मम धर्म-
बाहुर्वक्षःस्थलं [illegible]ऽव्यात् ॥ २० ॥ ममोदरं पातु
गिरीन्द्रधन्वा म[illegible] मदनान्तकारी । हेरम्बतातो मम
पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ॥ २१ ॥ गुह्यं हरो
रक्षतु वासुकीशः पृष्ठं ममाव्या[illegible]नापगेशः । ऊरुद्वयं पातु कुबे-
[illegible]मित्रो जानुद्वये मे जगदीश्वरोऽव्यात् ॥ २२ ॥ जङ्घाद्वयं

भुजङ्गकेतुरव्यात्पादौ ममाव्यात्सुरवन्द्यपादः । पायान्ममान्तः-
करणं परात्मा सर्वाङ्गमव्यान्मम सर्वगुप्तः ॥ २३ ॥ महेश्वरः
पातु दिनादियामे मां मध्ययामेऽवतु वामदेवः । त्रिलोचनः
पातु तृतीययामे वृषध्वजः पातु दिनान्तयामे ॥ २४ ॥ पाया-
न्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु मां निशीथे । गौरी-
पतिः पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम् ॥ २५ ॥
अन्तःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु बहिःस्थितं
माम् । तदन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां सम-
न्तात् ॥ २६ ॥ तिष्ठन्तमव्याद्भुवनैकनाथः पायाद्व्रजन्तं प्रमथा-
धिनाथः । वेदान्तवेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवः
शयानम् ॥ २७ ॥ मार्गेषु मां रक्षतु नीलकण्ठः शैलादिदुर्गेषु
पुरत्रयारिः । अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदार-
शक्तिः ॥ २८ ॥ कल्पान्तकालोग्रपटुप्रकोपस्फुटाट्टहासोच्चलि-
ताण्डकोशः । घोरारि[illegible]र्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः
॥ २९ ॥ [illegible]सहस्रलक्षायुतकोटिभीषणम्
अक्षौहिणीनां [illegible]तायिनां छिन्द्यान्मृडो घोरकुठारधारया
॥ ३० ॥ [illegible]लयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरान्त-
कस्य । [illegible]दिहिंस्रान्संत्रासयत्वीशधनुः पिनाक-
॥ ३१ ॥ [illegible]शकुनदुर्गमदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसह-
दुर्यशांसि । [illegible]विषभीतिमसद्ग्रहार्तिं व्याधींश्च नाशयतु
मे जगतामधी[illegible] ॥ ३२ ॥ ॐ नमो भगवते सदाशिवाय
[illegible]सर्वयन्त्राधिष्ठिताय सर्वतन्त्रस्वरूपाय सर्वमन्त्र-
[illegible]रूपाय स[illegible]राय ब्रह्मरुद्रावतारिणे नीलकण्ठाय पार्व-

...मनोहरप्रियाय सोमसूर्याग्निलोचनाय ... महामुकुटधारिणे माणिक्यभूषणाय सृष्टिस्थितिप्रलयकालरौद्रावताराय दक्षाध्वरध्वंसकाय महाकालभेदनाय मूलाधारैकनिलयाय तत्त्वातीताय गङ्गाधराय सर्वदेवाधिदेवाय षडाश्रयाय वेदान्तसाराय त्रिवर्गसाधनाय अनेककोटिब्रह्माण्डनायकाय अनन्तवासुकितक्षककार्कोटकशङ्खपालकुलिक...नागकुलभूषणाय प्रणवस्वरूपाय चिदाकाशाय ...स्वरूपाय सकलग्रहनक्षत्रमालिने सकलाय सकलकलङ्करहिताय सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकललोकैकवरप्रदाय सकलनिगमगुह्याय सकलवेदान्तपारगाय सकलदुरितार्तिभञ्जनाय सकलजगदभयङ्कराय सकललोकैकशङ्कराय शशाङ्कशेखराय शाश्वतनिजावासाय निर्गुणाय नीरूपाय निराभासाय निरामयाय निरातंकाय निष्प्रपञ्चाय निष्कलङ्काय निर्द्वन्द्वाय निःसङ्गाय ... निर्गमाय निरुपमविभवाय निर्भयाय निर्लोभाय निष्क्रोधाय निश्चिन्ताय निरहंकाराय निराकुलाय निराधाराय नित्यशुद्धबुद्धपरिपूर्णसच्चिदानन्दाय परमशान्तप्रकाश...तेजोरूपाय जय जय रुद्र महारुद्रवीरभद्रावतार ... कालभैरव कल्पान्त... कपालमालाधर ... पाशांकुशडमरुकशूलचापबाणगदाशक्तिभिण्डिपालतोमर...मुद्गरप्रासपट्टिशपाशपरशुपरिघभुशुण्डीशतघ्नीचक्रा...भीषणकर सहस्रमुख दंष्ट्राकरालविकटाट्टहासविस्फारित...मण्डल नागेन्द्रकुण्डल नागेन्द्रहारवलय नागेन्द्रचर्म... मृत्युञ्जय त्र्यंबकत्रिपुरा-

प्रणवके विरूपाक्ष विश्वेश्वर विश्वरूप वृषभवाहन विषभीषण
विश्वतोमुख सर्वतो मां रक्ष रक्ष ज्वल ज्वल प्रज्वल २ महा
मृत्युभयं नाशय २ विषसर्पभयं शमय २ रोगभयमुत्सादय २
चोरभयं नाशय २ चोरान्मारय २ मम शत्रून् उच्चाटय २
त्रिशूलेन विदारय २ कुठारेण भिन्धि २ खड्गेन छिन्धि २
खट्वाङ्गेन विपोथय २ मुसुलेन निष्पेषय २ बाणैः सन्ताड
२ तृतीयनेत्रेण सन्तापय २ रक्षांसि भीषय २ भूतान् विद्रा
वय २ कूष्माण्डवेतालभूतमारीब्रह्मराक्षसगणान् सन्त्रासय
ममाऽभयं कुरु २ वित्रस्तं मामाश्वासय २ नरकमहाभयान्मामु
द्धर २ संजीवय २ क्षुत्तृड्भ्यां मामाप्यायय २ दुःखातुरं मामा
नन्दय २ शिवकवचेन मामाच्छादय २ त्र्यम्बक सदाशिव
नमस्ते नमस्ते नमस्ते ॥ ऋषभ उवाच । इतीदं कवचं शैवं
वरदं व्याहृतं मया । सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम् ॥१॥
यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् । न तस्य जायते
क्वापि भयं शम्भोरनुग्रहात् ॥ २ ॥ क्षीणायुः प्राप्तमृत्युर्वा
महारोगहतोऽपि वा । सद्यः सुखमवाप्नोति दीर्घमायुश्च विन्दति
॥ ३ ॥ सर्वदारिद्र्यशमनं सौमङ्गल्यविवर्धनम् । यो धत्ते कवचं
शैवं स देवैरपि पूज्यते ॥ ४ ॥ महापातकसंघातैर्मुच्यते चोप
पातकैः । देहान्ते मुक्तिमाप्नोति शिववर्मानुभावतः ॥ ५ ॥
त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम् । धारयस्व मया
दत्तं सद्यः श्रेयो ह्यवाप्स्यसि ॥ ६ ॥ इति श्रीस्कन्दपुराणे शि
वकवचं सम्पूर्णम् ॥

[illegible]ेपार्थं शिवमहिमस्तोत्रम् ॥

[illegible] ॥ "[illegible]धीनामगदं दिव्यं व्याधीनां मूलकृ-
[illegible] । उपद्रवानां दलनं महादेवमुपास्महे ॥ १ ॥
[illegible] पापक्षपणनिपुणः शङ्कर ! भवानऽहं भीतो
[illegible]भयवितरणे ते व्यसनिता । अहं दीनो दीनो-
[illegible]विधिसज्जस्त्वमितरन्न जानेऽहं वक्तुं कुरु सकल-
[illegible] मयि कृपाम् ॥ २ ॥ जनास्त्वत्पादाब्जश्रवण-
[illegible]ाननिपुणाः स्वयं ते निस्तीर्णा न खलु करुणा
करणा । भवे लीने दीने मयि मननहीने न करुणा
[illegible] ख्यातस्त्वमसि करुणासागर इति ॥ ३ ॥"
[illegible]हिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीना-
[illegible] तदवसन्नास्त्वयि गिरः । अथावाच्यः सर्वः स्वमतिपरि
[illegible]वधि गृणन्ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥ १ ॥
[illegible] पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं
[illegible]कितमभिधत्ते श्रुतिरपि । स कस्य स्तोतव्यः [illegible]विधगुणः
[illegible] विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २ ॥
[illegible]स्फीता वाचः परममृतं निर्मितवतस्तव ब्रह्मन् किं वागपि
[illegible]गुरोर्विस्मयपदम् । मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
[illegible] [illegible]त्यर्थेऽस्मिन्पुरमथन ! बुद्धिर्व्यवसिता ॥ ३ ॥ तवैश्वर्यं
[illegible]जगदुदयरक्षाप्रलयकृत्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु
[illegible]तनुषु । अभव्यानामस्मिन्वरद ! रमणीयामरमणीं विहन्तुं व्या-
[illegible]शीं विदधत इहैके जडधियः ॥ ४ ॥ किमीहः किंकायः

स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपा-
दानमिति च । अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुत-
र्कोऽयं कांश्चिन्मुखरयति मोहाय जगताम् ॥ ५ ॥ अजन्मानो
लोकाः किमवयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिर-
नादृत्य भवति । अनीशो वा कुर्याद्भुवनजनने कः परिकरो यतो
मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥ ६ ॥ त्रयी सांख्यं योगः
पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति
च । रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्य-
स्त्वमसि पयसामर्णव इव ॥ ७ ॥ महोक्षः खट्वाङ्गं परशुरजिनं
भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणम् । सुरास्तां
तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां नहि स्वात्मारामं विषयमृग-
तृष्णा भ्रमयति ॥ ८ ॥ ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये । समस्तेऽप्येत-
स्मिन्पुरमथन तैर्विस्मित इव स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा
मुखरता ॥ ९ ॥ तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः परि-
च्छेत्तुं यातावनलमनलस्कन्धवपुषः । ततो भक्तिश्रद्धाभरगुरु-
गृणद्भ्यां गिरिश यत्स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न
फलति ॥ १० ॥ अयत्नादासाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो
यद्बाहूनभृत रणकण्डूपरवशान् । शिरःपद्मश्रेणीरचितचरणाम्भो-
रुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥ ११ ॥
अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेऽपि त्वदधि-
वसतौ विक्रमयतः । अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः ॥ १२ ॥

ह्मणो वरद! परमोच्चैरपि सतीमधश्चक्रे बाणः परिजन-
विधेयत्रिभुवनः । न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न
कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥ १३ ॥ अकाण्ड-
ब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयन! विषं
संहृतवतः । स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥ १४ ॥ असिद्धार्था
नैव क्वचिदपि सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो
यस्य विशिखाः । स पश्यन्नीश त्वामितरसुरसाधारणमभूत्स्मरः
स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः ॥ १५ ॥ मही पादा-
घाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्ण-
ग्रहगणम् । मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्र-
क्षायै त्वं नटसि ननु वामैव विभुता ॥ १६ ॥ वियद्व्यापी
तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघु दृष्टः
शिरसि ते । जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवो-
न्नेयं धृतमहिम! दिव्यं तव वपुः ॥ १७ ॥ रथः क्षोणी यन्ता
शतधृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः [illegible] र
इति । दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिर्विधेय [illegible]
न्त्यो न खलु परतन्त्राः प्रभुधियः ॥ १८ ॥ हरिस्ते [illegible]
[illegible] बलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहर [illegible] भू
[illegible] भक्त्युद्रेकः परिणतिमसौ चक्रवपुषस्त्रयाणां रक्षायै त्रिपुर-
[illegible] जागर्ति जगताम् ॥ १९ ॥ क्रतौ सुप्ते जाग्रत् [illegible] फल-
[illegible] क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते । अत-
[illegible] फलदानप्रतिभुवं श्रुतौ श्रद्धां बद्ध्वा दृढपरि

[illegible]ः कर्मसु जनः ॥ २० ॥ क्रियादक्षो दक्षः क्रतुपतिरधीश-
स्तनुभृतामृषीणामार्त्विज्यं शरणद ! सदस्याः सुरगणाः । क्रतु-
भ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरम-
भिचाराय हि मखाः ॥ २१ ॥ प्रजानाथं नाथ प्रसभमभिकं
स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा । धनु-
ष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न
मृगव्याधरभसः ॥ २२ ॥ अपूर्वं लावण्यं विवसनतनोस्ते
विस्मृततां मुनीनां दाराणां समजनि स कोपव्यतिकरः । यतो
भवे गुणे सकृदपि सपर्यां विदधतां ध्रुवं मोक्षोऽश्लीलं किमपि
पुरुषार्थप्रसवि ते ॥ २३ ॥ स्वलावण्याशंसा धृतधनुषमह्नाय
तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि । यदि स्त्रैणं दे
यमनिरत देहार्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवत
॥ २४ ॥ श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा[illegible]
भस्मालेपः स्रगपि नृकरोटीपरिकरः । अमङ्गल्यं शीलं तव भवतु
नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मङ्गलम् ॥ २५ ॥
मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः
प्रमदसलिलोत्सङ्गितदृशः । यदालोक्याह्लादं ह्रद इव निमज्ज्या
मृतमये दधत्यन्तस्तत्त्वं किमपि यमिन[illegible]ल भवान् ॥ २६
त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह[illegible] व्योम
[illegible] धरणिरात्मा त्वमिति च । परिच्छिन्नामेवं [illegible] परिणता बिभ्र
[illegible]
गिरं न विद्मस्तत्तत्त्वं वयमिह [illegible] त्वं न भवसि ॥ २७ ॥ त्रयीं
तिस्रो वृत्तीस्त्रिभुवनमथो [illegible]
धत्तीर्णविकृति [illegible]

स्तं-त्वां शरणद गृणात्योमिति पदम् ॥ २८ ॥ भवः
रुद्रः पशुपतिरथोग्रः सह महांस्तथा भीमेशानाविति
ानाष्टकमिदम् । अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुति-
यायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते ॥ २९ ॥
दुर्भावादनुमितमिदं जन्मनि पुरा पुरारे! नैवाहं क्वचिदपि
प्रणतवान् । नमन्मुक्तः सम्प्रत्यतनुरहमग्रेप्यनति
श ! क्षन्तव्यं तदिदमपराधद्वयमपि ॥ ३० ॥ नमो
य प्रियदव दविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर
य च नमः । नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
सर्वस्मै ते तदिदमिति सर्वाय च नमः ॥ ३१ ॥ बहलर-
विश्वोत्पत्तौ भवाय नमो नमः प्रबलतमसे तत्संहारे हराय
नमः । जनसुखकृते सत्वोद्रिक्तौ मृडाय नमो नमः प्रम-
पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३२ ॥ कृशपरि-
चेतः क्लेशवश्यं क्वचेदं क्व च तव गुणसीमोल्लङ्घिनी शश्व-
ः । इति चकितममन्दीकृत्य मां भक्तिराधाद्वरद चर-
ते वाक्यपुष्पोपहारम् ॥ ३३ ॥ सुरभुजगनरेन्द्रैरर्चितस्ये
ौलेः प्रथितगुणगरिम्णो ज्ञानकारुण्यमूर्तेः । सकलगुण-
ः पुष्पदन्ताऽभिधानो व्यदधदऽलघुवृत्तः स्तोत्रमेतद्गरीयः
४ ॥ असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे सुरतरुवर-
ा लेखनी पत्रमुर्वी । लिखति यदि गृहीत्वा शारदा सर्व
कालदपि तव गुणानामीश ! पारं न याति ॥ ३५ ॥ अ-
ं धूर्जटेः स्तोत्रमेतत्पठति परमभक्त्या शुद्धचित्तः पु-
। स भवति शिवलोके रुद्रतुल्यस्तथात्र प्रचुरतरधनायुः

पुत्रवान्कीर्तिमांश्च ॥ ३६ ॥ दीक्षा दानं तपस्तीर्थस्नानं यो
दिकाः क्रियाः । महिम्नस्तव पाठस्य कलां नार्हन्ति षोडशीम्
॥ ३७ ॥ महेशान्नापरो देवो महिम्नो नापरा स्तुतिः । अघो
रान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥ ३८ ॥ कुसुमद
शननामा सर्वगन्धर्वराजः शशधरवरमौलेर्देवदेवस्य दासः । स
गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्स्तवनमिदमकार्षीद्दिव्य
दिव्यं महिम्नः ॥ ३९ ॥ सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं पठति
यदि मनुष्यः प्राञ्जलिर्नान्यचेताः । व्रजति शिवसमीपं किन्नरैः
स्तूयमानः स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥ ४० ॥ श्री
पुष्पदन्त मुखपङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरप्रियेण
कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपति
र्महेशः ॥ ४१ ॥ इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः
अर्पिता तेन मे देवः प्रीयतां च सदाशिवः ॥ ४२ ॥ क्षे०
आ किं न रक्षसि नयत्ययमन्तको मां हेलावलेप
मघः किमयं महेश । मा नाम भूत्करुणया हृदय
पीडा व्रीडापि नास्ति शरणागतमुज्झतस्ते ॥
श्रीपुष्पदन्तविरचितं शिवमहिम्नस्तोत्रमनल्पना

शिवचामरार्थं जयस्तुत्यादि शिवस्तोत्र

जय सर्वजनाधीश जय गौरीपते शिव । जय [illegible]
[illegible]धरेश्वर । जय दग्धपुराध्यक्ष जय का[illegible]
जय [illegible]मेश जय भक्तानुकम्पक ॥ जय त्रै[illegible]
जय निर्गुण सद्गुण । जयानन्तगुणारम्भ जय घोर [illegible]

जय चन्द्रकलाक्रान्त जय नागेन्द्रभूषण । जय पुङ्गवसत्केतो
जय त्र्यक्ष महेश्वर ॥ जयान्तकरिपो शम्भो जय सर्गादि-
कारण । जय पञ्चकलातीत जय शूलिन्कपालभृत् ॥ जयोपेन्द्रे-
न्द्रचन्द्राद्य जय नन्द्यादिवन्दित । जयानेकगणाधीश जय
स्वामिन् महेश्वर ॥ जय विश्वाद्य विश्वेश जय विश्वैककारण ।
जय विश्वसृजां मुख्य जय विश्वस्य सद्गुरो ॥ जय निरामय
जय सुधामय जय धृतामृतदीधिते, जय हतान्तक जय
कृतान्तक जय पुरान्तक सद्गते । जय परापर जय दयापर जय
नतार्पितसद्गते जय जितस्मर जय महेश्वर जय जय त्रिजग-
त्पते ॥ इति जयस्तुतिः ॥ व्याप्तचराचरभावविशेषं चिन्म-
यमेकमनन्तमनादिम् । भैरवनाथमनाथशरण्यं तन्मयचित्ततया
हृदि वन्दे ॥ १ ॥ त्वन्मयमेतदशेषमिदानीं भाति मम त्वदनुग्रह-
शक्त्या । त्वं च महेश सदैव ममात्मा स्वात्ममयं मम तेन
समस्तम् ॥ २ ॥ स्वात्मनि विश्वगते त्वयि नाथे तेन न संसृ-
तिभीतिकथास्ति । सत्स्वपि दुर्धरदुःखविमोहत्रासविधायिषु
कर्मगणेषु ॥ ३ ॥ अन्तक मां प्रति मा दृशमेनां क्रोधकराल-
तमां विदधीहि । शङ्करसेवनचिन्तनधीरो भीषणभैरवशक्ति-
मयोऽस्मि ॥ ४ ॥ इत्थमुपोढभवन्मयसंविद्दीधितिधारितभूरि-
तमिस्रः । मृत्युयमान्तककर्मपिशाचैर्नाथ नमोस्तु न जातु
बिभेमि ॥ ५ ॥ प्रोदितसत्यविबोधमरीचिप्रोक्षितविश्वपदार्थ-
सतत्त्वः । भावपरामृतनिर्भरपूर्णे त्वय्यहमात्मनि निर्वृतिमेमि
॥ ६ ॥ मानसगोचरमेति यदैव क्लेशदशाऽतनुतापविधात्री ।
नाथ तदैव मम त्वदभेदस्तोत्रपरामृतवृष्टिरुदेति ॥ ७ ॥ शङ्कर-

सत्यमिदं व्रतदानस्नानतपो भवतापविनाशि । तावकशास्त्रपरा
मृतचिन्ता सिन्धति चेतसि निर्वृतिधाराः ॥ ८ ॥ नृत्यति
गायति हृष्यति गाढं संविदियं मम भैरवनाथ । त्वां प्रियमाप
सुदर्शनमेकं दुर्लभमन्यजनैः समयज्ञम् ॥ ९ ॥ वसुरसपौ
कृष्णदशम्यामभिनवगुप्तः स्तवमिममकरोत् । येन विभुर्भव
रुसन्तापं शमयति झटिति जनस्य दयालुः ॥ १०
इत्यऽभिनवोक्तभैरवस्तुतिः ॥ अतिभीषणकटुभाषणय
किंकरपटलीकृतताडनपरिपीडनमरणागमसमये । उमया स
मम चेतसि यमशासन निवसञ्छिव शंकर शिव शंकर हर
हर दुरितम् ॥ १ ॥ अतिदुर्नयचटुलेन्द्रियरिपुसञ्चयद
पनिकर्कशकटुजल्पितखलगर्हणचलिते । शिवया सह
चेतसि शशिशेखर निवसञ्छिव० ॥ २ ॥ भवभञ्जन सुररञ्ज
खलवञ्चन पुरहन् दनुजान्तक मदनान्तक रविजान्तक भ
वन् । गिरिजावर करुणाकर परमेश्वर भयहञ्छिव श० ॥ ३
शक्रशासन कृतशासन चतुराश्रमविषये कलिविग्रह भग्न
रिपुदुर्बलसमये । द्विजक्षत्रियवनिताशिशुदरकम्पितहृदये शि
॥ ४ ॥ भवसंभवविविधामयपरिपीडितवपुषं दयिता
ममताभरकलुषीकृतहृदयम् । कुरु मां निजचरणार्चननिरतं
सततं शिव० ॥ ५ ॥ इति चामरार्थं जयस्तु
शिवस्तोत्रत्रयम् ॥ अथ पञ्चाक्षरषडक्षरशिवस्तो
नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय ।
धिदेवाय दिगम्बराय तस्मै नकाराय नमःशिवाय ॥
मातङ्गचर्माम्बरभूषणाय समस्तगीर्वाणगणार्चिताय । शैल

नाथाय पुरान्तकाय तस्मै मकाराय ॥ २ ॥ शिवामुखाम्भोज-
विकासनाय दक्षस्य [illegible] विनाशकाय । चन्द्रार्कवैश्वानरलो-
चनाय तस्मै शिकारा० ॥ ३ ॥ वसिष्ठकुम्भोद्भवगौतमादि-
मुनीन्द्रवन्द्याय गिरीश्वराय । श्रीनीलकण्ठाय वृषध्वजाय तस्मै
वकारा० ॥ ४ ॥ यज्ञस्वरूपाय जटाधराय पिनाकहस्ताय
सनातनाय । नित्याय शुद्धाय निरञ्जनाय तस्मै यकाराय०
॥ ५ ॥ इति ॥ ॐकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति
योगिनः । कामदं मोक्षदं चैव ॐकारं तं नमाम्यहम् ॥ १ ॥
न जातो न मृतो यस्य [illegible] यस्य न विद्यते । नमन्ति दैवताः
सर्वे नकारं तं० ॥ २ ॥ महादेवं महानन्दं महाध्यानपरा-
यणम् । महापापहरं देवं मकारं तं० ॥ ३ ॥ शिवात्परतरो
नास्ति शिवशास्त्रेषु निश्चयः । शमन्ति सर्वपापानि शिकारं०
॥ ४ ॥ वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम् । वामे
शक्तिधरं देवं वकारं तं० ॥ ५ ॥ यत्र तत्र स्थितो देवः
सर्वव्यापी महेश्वरः । यो गुरुः सर्वदेवानां यकारं तं० ॥ ६ ॥
[illegible] कर्मचक्रेषु नकारं नाभिमण्डले । मकारं हृदये देवो
[illegible] कण्ठभूषणम् । वकारं चक्रमध्ये तु यकारं ब्रह्मरन्ध्रगम् ॥
[illegible] षडक्षरस्तोत्रं यः पठेच्छिवसन्निधौ । शिवलोकमवाप्नोति
[illegible] सह मोदते ॥ इति पञ्चाक्षरषडक्षरशिवस्तुतिः ॥

अथ शिवनिर्वाणस्तुतिः ॥ क्षमापनस्तुतिश्च ॥

जयत्यऽनन्यसामान्यप्रकृष्टगुणवैभवः । संसारनाटकारम्भ
निर्वाहनकविः शिवः । ॐनमः शिवाय भूतभव्यभाविभा
भाविने । ॐनमःशिवाय मातृमानमेयकल्पनाजुषे । ॐनमः
भीमकान्तशान्तशक्तिशालिने । ॐ०शाश्वताय शङ्कराय शम्भवे
ॐ० निर्निकेतनिःस्वभावमूर्त्तये । ॐ०निर्विकल्पनिष्प्रपञ्च
संविदे । ॐ०निर्विवादनिष्प्रमाणसिद्धये । ॐ० निर्मला
निष्कलाय वेधसे । ॐ०पार्थिवाय गन्धमात्रसंविदे । ॐ०
साधसाम्यरस्सतृप्तये ॥ १० ॥ ॐ०तैजसाय रूपितानिरूपिणे
ॐ०पावनाय सर्वभावसंस्पृशे । ॐ०नाभसाय शब्दमात्रराविणे
ॐ०निर्गलन्मलव्ययायि पायवे । ॐ०विश्वसृष्टिसौष्ठवैकमेधसे
ॐ०सर्वतः प्रसारिपादसम्पदे । ॐ०विश्वभोग्यभोगयोग्यपाण
ॐ०वाचकप्रपञ्चवाच्यवाचिने । ॐ० नसगन्धसर्वगन्धबन्धवे
ॐ०पुद्गलालिलोलकाप्रशालिने ॥ २० ॥ ॐ०चाक्षुपाय वि
रूपसन्दृशे ॐ०तद्गुणत्रयविभागभूतये । ॐ०पौरुषाय भो
दाय मानिने । ॐ०सर्वतो नियन्तृतानियामिने । ॐ०काम
दकल्पनोपकल्पिने । ॐ०किञ्चिदेव वस्तुताकारसृजे । ॐ
किञ्चिदेव वेतृतोपपादिने । ॐ०सर्वभोग्यवर्जनोपरागिणे । ॐ
शुद्धविद्यतत्त्वमन्त्ररूपिणे । ॐ०दक्वयात्रिकस्वरैरात्मने ॥२०
ॐ०सर्ववित्प्रभो सदाशिवाय ते । ॐ०वाच्यवाचकादिप
भितये । ॐ०वर्णसंसृष्टत्वोपपादिने । ॐ०पञ्चधा कला

ना[illegible]पश्चिने । ॐ०सौरजैनबौद्धशुद्धभागिने । ॐ०भक्तिमात्रल-
वि[illegible]दर्शनाय ते । ॐ०सर्वतो गरीयसां गरीयसे । ॐ०सर्वतो
[illegible]हीयसां महीयसे । ॐ०सर्वत[illegible]वीयसां स्थवीयसे । ॐ०-
[illegible]स्यमस्त्वणीयसामणीयसे ॥ ४० ॥ ॐ०[illegible]द्रिकन्दराधि-
[illegible]यिने । ॐ०जाह्नवीजलौ[illegible] । ॐ०भालचन्द्रच-
न्द्रिकाकिरीटिने । ॐ०सोम[illegible] । ॐ०कालकू-
[ट]कण्ठपीठसुश्रिये । ॐ०धर्म[illegible] । ॐ०भस्मधू-
[illegible]शालिने त्रिशूलिने । ॐ०सर्व[illegible]लिने कपालिने । ॐ०-
[illegible]दैत्यमर्दिने कपर्दिने । ॐ०[illegible]किने पिनाकिने
॥ ५० ॥ ॐ०नागराजहारिणे [illegible]रिणे । ॐ०शैलजाविलासिने
[illegible]खासिने । ॐ०मन्मथप्रमाथिने [illegible] । ॐ०कालदेहदाहयु-
क्तिकारिणे । ॐ०नाग[illegible]वाससे । ॐ०भीषणश्म-
शानभूमिवासिने । ॐ०[illegible]कोपपादिने । ॐ०सिद्ध-
[illegible]योगिने वियोगिने । ॐ०[illegible]कर्तृनयादिकारिणे । ॐ०-
सर्वतीर्थतीर्थताविधायिने ॥ ६० ॥ ॐ०साङ्गवेदतद्विचारचा-
[illegible]वे । ॐ०षट्पदार्थषोडशार्थवादिने । ॐ०सांख्ययोगपाञ्चरा-
त्रपश्चिने । ॐ०धातृविष्णुशर्वकर्तृरूपिणे । ॐ० धातृविष्णु
[illegible]सात्मरूपिणे । ॐ०भोग्यदाय भोग्यभोगरूपिणे । ॐ०पा-
[illegible]गाय पारणाय मन्त्रिणे । ॐ०पारमार्थ[illegible]रूपिणे । ॐ०-
सर्वमण्डलाधिपत्यशालिने । ॐ०[illegible]नासिने
॥ ७० ॥ ॐ०सर्व[illegible]वासनारसात्मने । ॐ०सर्व[illegible]नि-
[illegible]गिने । ॐ०[illegible]य नित्यकर्ममालिने । ॐ०कालकल्प-
[illegible]ने सुकल्पिने । ॐ०सत्ककाय सौख्यदाय [illegible] । ॐ०-
[illegible]स्वरात्मलक्ष्यलक्षिणे । ॐ०[illegible]धारिणे ।

ॐ०सर्वभावकुदुदुद्धिहेतवे । ॐ०सर्वसिद्धिदायिने सुमायिने
ॐ०भक्तिमान्तसंस्तुताय शूलिने ॥ ८० ॥ ॐनमः शिवाय
भास्वते । ॐ०भर्ग ते । ॐ०शर्व ते । ॐ०गर्व ते । ॐ०खर्व
ते । ॐ०पर्व ते । ॐ०रुद्र ते । ॐ०भीम ते । ॐ०
विष्णवे । ॐ०जिष्णवे । ९० । ॐ०धन्विने । ॐ०खड्गिणे
ॐ०चर्मिणे । ॐ०वर्मिणे । ॐ०कर्मिणे । ॐ०धर्मिणे
ॐ०भामिने । ॐ०कामिने । ॐ०योगिने । ॐ०भोगिने
ॐ०तिष्ठते । ॐ०[illegible] । ॐ०हेतवे । ॐ०सेतवे । ॐ०सर्वतः
ॐ०सर्वेशः । ॐ०सर्वदा । ॐ०सर्वथः १०८ ॥ भव शर्व
रुद्रहर शंकर भूतपते गिरिश गिरीश भर्ग शशिशेखर नीलगल
त्रिनयन वामदेव गिरिजाधव माररिपो जयजय देवदेव भग
वन्भवतेऽस्तु नमः ॥ एतामष्टोत्तरशतनमस्कारसंस्कारपूत
भूतार्थव्याहृतिनुतिमुदाहृत्य मृत्युञ्जयस्य । कश्चिद्विद्वान्यदि
कुशलं सञ्चिनोति स किञ्चिदेनान्येषां भवति पठतामीप्सित
प्रेप्स सिद्धिः । इति व्यासोक्तनिर्वाणस्तुतिः ॥ अथ
शिवापराधक्षमापनस्तुतिः ॥ [illegible] कर्मप्रसङ्गात्कलयति
कलुषं मातृकुक्षौ स्थितं मां [illegible] हति नित
जाठरो जातवेदाः । यद्यद्वै तत्र दुःखं व्यथयति विवि
शक्यते केन वक्तुं क्षन्तव्यो [illegible] शिव शिव शिव भो
श्रीमहादेव शम्भो ॥ १ ॥ [illegible] दुःखातिरेकान्मललुलितवपु
स्तन्यपाने पिपासी नो शक्य [illegible] ब्धेभ्यो भवगुणजनितैर्जन
संप्रदष्टः । नानारोगादिदुः [illegible] रवशः शङ्कर न म
क्षन्तव्यो मेऽपराधः० ॥२॥ प्रौढोऽहं यौवनस्थो विषयवि

श्वभिर्मर्मसन्धौ दष्टो नष्टो विवेकात्सुतधनयुवतिस्वादुसौख्ये
निषण्णः । शैवीचिन्ताविहीनः प्रतपनरतो मानगर्वाविरूढः
क्षन्तव्यो मे० ॥ ३ ॥ वार्धक्ये चेन्द्रियाणां विनतिगतमति-
श्चाधिदैवाधिभूतैर्दुःखै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढिहीनोऽ-
तिदीनः । मिथ्यामोहाभिलाषैर्भ्रमन्नलिगणवत् धूर्जटेर्ध्यान-
भ्रष्टः क्षन्तव्यो० ॥ ४ ॥ स्नात्वा प्रत्यूषकाले स्नपनविधिकृते
नाहृतं गाङ्गतोयं पूजार्थं वा कदाचिद्बहुतरगहनात्खण्डबिल्वी-
दलानि । नानीता पद्ममाला सरसि विकसिता गन्धपुष्पै-
स्त्वदर्थं क्षन्तव्यो० ॥ ५ ॥ स्थित्वा पद्मासनेहं प्रणवयुतमरुत्कु-
ण्डलीसूक्ष्ममार्गाच्छान्ति नीते स्वशान्ते प्रकटितविभवं ज्योति-
रूपं पराख्यम् । लिङ्गैर्ब्रह्मवाक्यैः सकलतनुगतं शङ्करं न
स्मरामि क्षन्तव्यो० ॥ ६ ॥ ध्यात्वा चित्ते शिवाख्यं प्रचुरत-
रधनं नैव दत्तं द्विजेभ्यो हव्यं ते लक्षसंख्यैर्हुतवहवदने नार्पितं
बीजमन्त्रैः । नो तप्तं गाङ्गतीरे व्रतजपनियमैरुद्रजाप्यैर्न वेदैः
क्षन्तव्यो० ॥ ७ ॥ दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितैः स्नापितं
नैव लिङ्गं नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न
प्रसूनैः । धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव [illegible] हारैः
क्षन्तव्यो० ॥ ८ ॥ नो शक्यं स्मार्तकर्म प्रतिपदगहनं प्रत्य-
भिज्ञातुमीषच्छ्रौतं वाक्यं कथं वा द्विजवरसमदं [illegible]-
दीपम् । ज्ञेयो धर्मो विचारैः श्रवणमनु म[illegible] निदिध्या-
सितव्यं क्षन्तव्यो० ॥ ९ ॥ नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो
ध्वस्तमोहान्धकारो नासाग्रे न्यस्तदृष्ट्या विदितभवगुणो नैव दृष्टः
[illegible] । [illegible]वस्थया त्वं विगतकलिमल [illegible]ये नापि
प्राप्तः क्षन्तव्यो० ॥ १० ॥ चन्द्रोद्भासित[illegible] स्मरहरे

गङ्गाधरे शंकरे सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे ।
दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे मोक्षार्थं कुरु चित्त-
वृत्तिमखिलामन्यैस्तु किं कर्मभिः ॥ ११ ॥ किंवाऽनेन धनेन
वाजिकरिभिः प्राप्तेन राज्येन किं किंवा पुत्रकलत्रमित्रपशुभि-
र्देहेन गेहेन किम् । ज्ञात्वैतत् क्षणभङ्गुरं सपदि रे त्याज्यं मनो
दूरतः स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम् ॥१२॥
आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं प्रत्यायान्ति
गताः पुनर्न दिवसाः कालो जगद्भक्षकः । लक्ष्मीस्तोयतरङ्गभ-
ङ्गचपला विद्युच्चलं जीवितं तस्मान्मां शरणागतं शरणद त्वं रक्ष
रक्षाधुना ॥ १३ ॥ आत्मा त्वं गिरिजा मतिः सहचराः
प्राणाः शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा
समाधिस्थितिः । सञ्चारः पदयोः प्रदक्षिणविधिः
स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलं
शम्भो तवाराधनम् ॥ १ ॥ ब्रूषे नोत्तरमङ्ग पश्यसि न
मामेतादृशं दुःखितं विज्ञप्तिं बहुधा कृतां न शृणुषे
नायासि मन्मानसे । संसारार्णवगर्भमध्यपतितं
प्रायेण नालम्बसे बाकचक्षुःश्रवणाद्विना विरहितं त्वा-
माह सत्यं श्रुतिः ॥ २ ॥ करचरणकृतं वाक्कायजं कर्मजं
वा श्रवणनयनजं वा मानसं वाऽपराधम् । विहितमविहितं वा
सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शम्भो ॥१४॥
इति शंकराचार्यकृता शिवापराधक्षमापनस्तुतिः ॥
अथ रावणकृतदीनाक्रन्दाख्यशिवस्तवप्रारम्भः ॥ ॐ गौरीश्वराय
भुवनत्रयकारणाय भक्तप्रियाय भवभीतिभिदे भवाय । शर्वाय

दुःखशमनाय वृषध्वजाय रुद्राय कालदहनाय नमः शिवाय॥१॥
सर्वेश्वरत्वे सति भस्मशायिने ह्युमापतित्वे सति चोर्ध्वरेतसे ।
वित्तेशभृत्ये सति चर्मवाससे निवृत्तरागाय नमस्तपस्विने ॥२॥
ॐकारेण विहीनस्य नित्यमुद्विग्नचेतसः । तापत्रयाभितप्तस्य
त्राणं कुरु महेश्वर ॥ ३ ॥ कायपोषणसक्तस्य रोगशोकाकुलस्य
च । भवार्णवनिमग्नस्य त्राणं० ॥ ४ ॥ मदनोरगदष्टस्य क्रोधा-
ग्निज्वलितस्य च । लोभमोहादिसक्तस्य त्राणं० ॥ ५ ॥ तृष्णा-
शृङ्खलया नाथ बद्धस्य भवपञ्जरे । कृपार्द्रदीनचित्तस्य त्राणं०
॥ ६ ॥ भटैर्नानाविधैर्घोरैर्यमस्याज्ञाविधायकैः । तां दिशं
नीयमानस्य त्राणं० ॥ ७ ॥ दुष्टस्य नष्टचित्तस्य श्रेष्ठमार्गोज्झि-
तस्य च । अनाथस्य जगन्नाथ त्राणं० ॥ ८ ॥ संसारपाश-
दृढबन्धनपीडितस्य मोहान्धकारविषमेषु निपातितस्य । कामा-
दितस्य भयरागखलीकृतस्य दीनस्य मे कुरु दयां परलोकनाथ
॥ ९ ॥ दीनोसि मन्दधिषणोसि निराश्रयोसि दासोसि
साधुजनतापरिवर्जितोसि । दुष्टोसि दुर्भगतमोसि गतत्रपोसि
धर्मोज्झितोसि विकलोसि कलङ्कितोसि ॥ १० ॥ भीतोसि
भङ्गुरतमोसि भयानकोसि शंकाशतव्यतिकराकुलचेतनोसि ।
रागादिदोषनिकरैर्मुखरीकृतोसि सत्यादिशौचनियमैः परि-
वर्जितोसि ॥ ११ ॥ जन्मादिनीश्रमणमारुतखेदितोसि निरा-
मयोस्म्यशरणोस्म्यसमञ्जसोसि । आशानिरङ्कुश[illegible]
कयार्दितोसि हास्योसि हा पशुपते शरणागतोसि ॥
हा हतोसि विनष्टोसि दष्टोसि चपलेन्द्रियैः । भवार्ण[illegible]
ग्नोसि किं त्रातुं मम नार्हसि ॥ १३ ॥ यदि नासि महाराशी

यदि नासि भयातुरः । यदि नेन्द्रियसंसक्तस्तत्कोर्थः शरणो
मम ॥ १४ ॥ आर्तो मत्सदृशो नान्यस्त्वत्तो नान्यः कृपापरः ।
तुल्य एवावयोर्योगः कथं नाथ न पाहि माम् ॥ १५ ॥ आक
र्णयाऽशु कृपणस्य वचांसि सम्यक् लब्धोसि नाथ बहुभिर्नतु
जन्मवृन्दैः । अद्य प्रभो यदि दयां कुरुषे न मे त्वं त्वत्तः परं
कथय कं शरणं व्रजामि ॥ १६ ॥ द्वेष्योहं सर्वजन्तूनां बन्धूनां
च विशेषतः । सुहृद्वर्गस्य सर्वस्य किमन्यत्कथयामि ते ॥१७॥
मातापितृविहीनस्य दुःखशोकातुरस्य च । आशापाशनिबद्धस्य
रागद्वेषयुतस्य च ॥ १८ ॥ देवदेव जगन्नाथ शरणागतवत्सल ।
नान्यस्त्रातास्ति मे कश्चित्त्वदृते परमेश्वर ॥ १९ ॥ भीतोसि
कालवशगोसि निराश्रयोसि खिन्नोसि दुःखजलधौ पतितोसि
शम्भो । आर्त्तोसि मोहपटलेन समावृतोसि त्वां चन्द्र
शरणं समुपागतोसि ॥ २० ॥ आशिखान्तं निमग्नोसि दु
भवकर्दमे । प्रसीद कृपया शम्भो पादाग्रेणोद्धर ... ॥२१॥
श्रुत्वा मे भवभीतस्य भगवन्करुणा गिरः । तथा कु
न बाधन्ते भवापदः ॥ २२ ॥ समयशतविलु
कुचैलं मलिनवसनगात्रं निर्दयं पापशीलम् । र
रोगिणं प्राप्तदुःखं खलजनपरिभूतं रक्ष मां सर्व
आपन्नोसि शरण्योसि सर्वावस्थासु सर्वदा । भ
रक्ष मां शरणागतम् ॥ २४ ॥ जातस्य जा
स्यापि देहिनः । माभूत्तत्र कुले जन्म यत्र
॥ २५ ॥ शङ्करस्य च ये भक्ताः शान्तास्तद्गत
दासोहं भूयां जन्मनि जन्मनि ॥ २६ ॥

संयुक्तं शिवइत्यक्षरद्वयम् । जिह्वाग्रे वर्तते यस्य ... तस्य
...वितम् ॥ २७ ॥ यत्कृतं यत्करिष्यामि तत्सर्वं न मया
...तम् । त्वया कृतं तु फलभुक्त्वमेव परमेश्वर ॥ २८ ॥ यदक्षर-
...भ्रष्टं मात्राहीनं च यद्भवेत् । मया दासेन विज्ञा... ...
...रमेश्वर ॥ २९ ॥ इति श्रीरावणकृता दीनाक्रन्दनस्तुतिः ॥

अथ कैवल्योपनिषत् ॥

ॐ अथाश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच ।
...धीहि भगवन् ! ब्रह्मविद्यां वरिष्ठां सदा सद्भिः सेव्यमानां
निगूढाम् । यथाऽचिरात्सर्वपापं विपोह्य परात्परं पुरुषं याति
विद्वान् ॥ तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यानयो-
...गादवेहि । न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व-
मानशुः ॥ परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो वि-
शन्ति । वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्ध-
सत्त्वाः ॥ ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे॥
विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरःशरीरः ।
अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य ॥
हृत्पुण्डरीके विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् ।
अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ॥
तथादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ।
उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ॥
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥

द्रं नागयज्ञोपवीतिनम् । व्याघ्रचर्मोत्तरीयं च वरे-
ण्यमभयप्रदम् ॥ कमण्डल्वक्षसूत्राभ्यामन्वितं शूल-
पाणिकम् । ज्वलन्तं पिङ्गलजटाशिखमुद्द्योतका-
रिणम् ॥ [illegible] हष्टमुमादेहार्धधारिणम् ।
दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम् ॥ दि-
ग्देवतासमायुक्तं सुरासुरनमस्कृतम् । नित्यं च शा-
श्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥ सर्वव्यापिनमीशानं
रुद्रं वै विश्वरूपिणम् । एवं ध्यात्वा द्विजः सम्यक्त-
तो यजनमाचरेत् ॥ मृत्युञ्जय महादेव पाहि मां
शरणागतम् । जन्ममृत्युजरारोगैः पीडितं भवबन्ध-
नैः ॥ इति विज्ञाप्य देवेशं जपेन्मन्त्रं च त्र्यम्बक-
म् ॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उ-
र्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ आ
त्वावहन्तु हरयः [illegible]तसः श्वैतैरश्वैरिह केतुमद्भि-

१ नम् २ वा ३ [illegible] नम्) ४ श्वैतैरश्वैःसह

वातांजवेन बलमद्भिर्मनोजवायातु शीघ्रं मम रुद्राय हव्यन्देवानां च ऋषीनां चासुराणां च पूर्वजं सहस्राक्षं विरूपाक्षं विश्वरूपं महादेवं शिवमावाहयाम्यहम् ॥ आवाहयाम्यहं देवमीश्वरं पार्वतीपतिम् । वृषभासनमारूढं नागाभरणभूषितम् । प्रीयतां यजमानस्य तुष्टो भूयाज्जगत्पतिः । शुक्लवर्णो महातेजाः शुक्लस्रग्दामभूषितः । बलिः पुष्पं चरुश्चैव धूपोऽयं प्रतिगृह्यताम् ॥

ॐ तत्पुरुषाय विद्महे । महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ ३ ॥

शतरुद्रियन्देवानां रुद्रशमनं भवाय शर्वायश्च [1]प्रत्युत्कान्तानुवाको देवर्षी रुद्रदैवत्यः त्रिष्टुप्छन्दश्चयने विनियोगः ॥ नमस्ते देवा रौद्रमानुष्टुभमाद्या, गायत्री [illegible] षष्ठ्यौ पङ्क्त्यन्त्या महापङ्क्ति-

1 पञ्चाहुतय

र्गा भैरेकपदा जगत्यनुष्टुप्त्रिष्टुब्महाबृहती यवम-
ध्या रुद्रो देवता चरमेष्टिको अस्य रुद्रस्य प्रश्नस्य
अनुष्टुप्छन्दः अघोरऋषिः सङ्कर्षणमूर्तिः सुरूपो यो-
ऽसावादित्यः परः पुरुषः स एव देवता अग्निक्रतुचर-
मायामिष्टिकायाँ शतरुद्रपाठे (होमे) विनियोगः ॥
सकलस्य रुद्राध्यायस्य श्रीमहारुद्रो देवता एका
गायत्री छन्दः तिस्रोऽनुष्टुभः तिस्रः पङ्क्तयः स-
प्तानुष्टुभो द्वे जगत्यौ परमेष्ठीऋषिः समस्तपापक्ष-
यार्थे सकलकामना सिद्ध्यर्थे श्रीमहारुद्रदेवतास-
न्तोषणार्थे रुद्रमन्त्रपाठे (होमे) विनियोगः ॥

अथार्षम् ॥ रौद्रोध्यायः परमेष्टिन आर्षं देवानां वा प्रजापतेर्वा ॥ नमस्ते रुद्रमन्यवे इत्याद्यो-ऽनुवाकः षोडशर्चः एकरुद्रदैवत्यः । प्रथमा गायत्री । तिस्रोऽनुष्टुभः । तिस्रः पङ्क्तयः । स-प्तानुष्टुभः । द्वे जगत्यौ ॥ नमो हिरण्यबाहवे इति । इत उत्तरं सर्वाणि यजूंषि द्रापे अन्ध-सस्पते इति यावत् द्वयोर्द्वयोः रुद्रयोः स्तुतिः तिस्रोऽशीतयः (तिस्रो नवतयः) रुद्रा-णां च कण्डिकायां अष्टावष्टौ च रुद्रा [illegible] न्येऽन्यतर [illegible] नमस्काराः । अन्ये रुद्राः ते शे-षतराः तेषामुभयतो नमस्काराः ॥ अपरे आतसंज्ञ[illegible] [illegible]ः समाभ्य इत्यादयः ॥ नमो वः किरिकेभ्य इत्यग्नि-वायु-सूर्य-हृदयभूताः [illegible] [illegible]यो बहुरुद्रदैवत्याः ॥ द्रापे अन्धसस्पते इत्यनुवाके दशकण्डिका एक रुद्र[illegible] [illegible]द्बृहती । द्वितीया जगती

१ एष रुद्रो २ हृदिय .

तृतीयानुष्टुप् । द्वे त्रिष्टुभौ । द्वेऽनुष्टुभौ ॥ असङ्ख्याता इति दशमन्त्रा अनुष्टुभो बहुरुद्रदैवत्या अवतानसंज्ञकाः ॥ ततो नमस्तेऽस्तु रुद्रेभ्य इति त्रीणि यजूंषि बहुरुद्रदैवतानि प्रत्यवरोहसंज्ञका मन्त्राः ॥

आ त्वावहन्तु नमस्ते रुद्रमन्यवे इत्यादि तमेषां जम्भे दधामीत्यन्तं षडनुवाकाः । ईशानान्त्वेति तिस्रोऽनुषङ्गाः ॥ देवानामार्षं रुद्रशमनमानुष्टुभः प्रथमो गायत्री द्वयाद्याः पङ्क्तीः पञ्चमषष्ट्यौ महापङ्क्तिः । पञ्चदशशेषम् ॥

अथ मन्त्रा नमस्कारा यजूंषि त्रिष्टुभा यदा (दयः) । द्वात्रिंशच्च द्वितीयाः स्युः पञ्च षट्सप्त चापरे ॥ त्रिंशच्चतुर्थी सैकाद्याश्चत्वारिंशच्च पञ्चमी । नमस्काराश्च चत्वार आद्याः षष्टस्य कीर्तिताः ॥ अनुष्टुब्पञ्चमी ज्ञेया मा भेरेकपदा ततः । सप्तमी जगती ज्ञेया चानुष्टुबष्टमी तनूः ॥ परिणो नवमी त्रिष्टुप्शान्तिः सा पुत्रपौत्रयोः । दशमी महाबृहती यवमध्येति तां विदुः ॥ द्वादशानुष्टुभश्चान्त्या यजूंषि च त्रिसङ्ख्यया । पञ्चविंशतिरेव स्युरनुवाके विभागदः ॥ इत्यार्षम् ॥

ध्यानम् कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदा रमन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥

ध्याये नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् । पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं खिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

ॐ नमः शिवाय वरदाय ॥ ॐ नमस्ते रुद्र म-
न्यवे बाहुभ्यामुत ते नमः । उतो त इषवे नमः ॥ या
ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तन्वा
शन्तमया गिरिशन्ताऽभिचाकशीहि ॥ यामिषुं गिरि-
शन्त हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा
हिंसीः पुरुषं जगत् ॥ शिवेन वचसा त्वा गिरिशा-
च्छा वदामसि । यथा नः सर्वमिज्जगदयक्ष्मँ सुमना
असत् ॥ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिष-
क् । अहींश्च सर्वाञ्जम्भयं सर्वाश्च यातुधान्योऽध-
राचीः परासुव ॥ असौ यस्ताम्रो अरुण उत बभ्रुः
सुमङ्गलः । ये चेमे रुद्रा अभितो दिक्षु श्रिताः ।
सहस्रशोऽवैषाँ हेळ ईमहे ॥ असौ यो [illegible]र्पति नी-
लग्रीवो विलोहितः । उतैनं गोपा [illegible] नुतैनमु-
दहार्यः ॥ उतैनं विश्वा भूतानि स [illegible] याति

१ यन्.

नः ॥ नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥ प्र-
मुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त
इषवः परा ता भगवो वप ॥ विज्यं धनुः कपर्दिनो
विशल्यो बाणवानुत ॥ ॥ अनेशन्नस्येषव आभुरस्य
निषङ्गथिः ॥ या ते हेतिर्मीढुष्टम हस्ते बभूव ते ध-
नुः । तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥ परि
ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य
इषुधिस्तवाऽरे अस्मन्निधेहि तम् ॥ नमस्त आयु-
धायाऽनातताय धृष्णवे । उभाभ्यामुत ते नमो बा-
हुभ्यां तव धन्वने ॥ अवतत्य धनुष्ट्वँ सहस्राक्ष श-
तेषुधे । निशीर्य शल्यानाँ मुखँ शिवो नः सुमना भ-
व ॥ यात इषुः शिवतमा शिवं बभूव ते धनुः । शि-
वा शरव्या या तव तया नो मृळ जीवसे ॥ ११०१॥

१ य २ धि: ३ स्वँ

ॐ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो । नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो । नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो । नमो बभ्लु[1]शाय व्याधिनेऽन्नानां पतये नमो । नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो । नमो भवस्य हेत्यै जगतां[2] पतये नमो । नमो रुद्रायाततायिने क्षेत्राणां पतये नमो । नमः सूतायाहन्त्या[3]य वनानां पतये नमो । नमो रोहिताय स्थपतये वृक्षाणां पतये नमो । नमो मन्त्रिणे वाणिजाय कक्षा[4]णां पतये नमो । नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो । नम आक्रन्दायत उच्चैर्घोषाय सत्वानां पतये नमो । नमः कृत्स्नं[5] वीताय धावते पत्तीनां पतये नमो । नमः सहमानाय निव्याधिन आव्याधिनी प-

१ भ्रु २ तां ३ न्वा ४ च्या ५ स्नं

तये नमो। नमो निषङ्गिण ककुभाय स्तेनानां पतये
नमो। नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो।
नमो निचेराय परिचरायारण्यानां पतये नमो।
नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो।
नमः सृकायिभ्यो जिघाँसद्भ्यो मुष्णतां पतये नमो।
नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यः प्रकृन्तानां पतये नमो।
नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये न-
मः ॥ १२ ॥ ७७ ॥ नम इषुकृद्भ्यो धन्वकृद्भ्यश्च
वो नमो। नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमो।
नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो।
नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमो। नमो वि-
सृजद्भ्यो विध्यद्भ्यश्च वो नमो। नमः स्वपद्भ्यो
जाग्रद्भ्यश्च वो नमो। नमः शयानेभ्य आसीने-
भ्यश्च वो नमो। नमः तिष्ठद्भ्यो धावद्भ्यश्च वो-

१ वि

नमो । नमः सभाभ्यः सभापतिभ्यश्च वो नमो ।
नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो । नम आव्या-
धिनीभ्यो विविध्यद्भ्यश्च वो नमो । नम उगणाभ्यः
तृँहतीभ्यश्च वो नमो । नमो व्रातेभ्यो व्रातपतिभ्य-
श्च वो नमो । नमो गणेभ्यो गणपतिभ्यश्च वो नमो ।
नमः कृच्छ्रेभ्यः कृच्छ्रपतिभ्यश्च वो नमो । नमो
विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो । नमः सेनाभ्यः
सेनानीभ्यश्च वो नमो । नमो रथिभ्यो वैरूथिभ्यश्च
वो नमो । नमो महद्भ्योऽर्भकेभ्यश्च वो नमो ।
नमो युवभ्य आशिनेभ्यश्च वो नमो । नमः क्षत्तृ-
भ्यः संग्रहीतृभ्यश्च वो नमो । नमः तक्षभ्यो रथ-
कारेभ्यश्च वो नमो । नमः कुलालेभ्यः कर्मारेभ्य-
श्च वो नमो । नमः पुञ्जिष्ठेभ्यो निषादेभ्यश्च वो
नमो । नमः श्वनिभ्यो मृगँयुभ्यश्च वो नमो ।

रथेभ्यश्च ३ सि ४ गा

नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ॥ ॥

नमो भवाय च रुद्राय च । नमः शर्वाय च पशुपतये च । नमो नीलग्रीवाय च शितिकण्ठाय च । नमो व्युप्तकेशाय च कपर्दिने च । नमः सहस्राक्षाय च शतधन्वने च ॥ १३ ॥ ७३ ॥

नमो गिरिशाय च शिपिविष्टाय च । नमो मीढुष्टमाय चेषुमते च । नमो ह्रस्वाय च वामनाय च । नमो बृहते च वर्षीयसे च । नमो वृद्धाय च सवृध्वने च । नमोऽग्र्याय च प्रथमाय च । नम आशवे चाजिराय च । नमः शीभ्याय[1] च शीघ्र्याय[2] च । नम ऊर्म्याय चावस्वन्याय च । नमो नाद्याय च द्वीप्याय च । नमो ज्येष्ठाय च कनिष्ठाय च । नमः पूर्वजाय चापरजाय च । नमो मध्यमाय चा[3]पगल्भाय च । नमो बुध्न्याय च जघन्याय च ।

१ भा २ घ्रा ३ चापगल्भाय (चाप्रगर्भाय)

नमः सोभ्याय च प्रतिसर्याय च । नम आशुषेणाय चाशुरथाय च ॥ ॥

नमो बिल्मिने च कवचिने च । नमो वर्मिणे च वरूथिने च । नमः शूराय चावभेदिने च । नमः श्रुताय च श्रुतसेनाय च । नमो याम्याय च क्षेम्याय च । नम उर्वर्याय च खल्याय च । नमः श्लोक्याय चावसान्याय च । नमः श्रवाय च प्रतिश्रवाय च । नमो वन्याय च कद्याय च । नमो दुन्दुभ्याय चाहनन्याय च । नमो धृष्णवे च प्रमृशाय च । नमो निषङ्गिणे चेषुधिमते च । नमः तीक्ष्णेषवे चायुधिने च । नमः स्वायुधाय च सुधन्वने च ॥ १४ ॥ ७३ ॥

नमः स्रुत्याय च पथ्याय च । नमः काट्याय च नीप्याय च । नमो नाद्याय च वैशन्ताय च ।

नमः कुल्याय च सरस्याय च । नमः कूप्याय चा-
वट्याय च । नमो वर्ष्याय चावर्ष्याय च । नमो
मेघ्याय च विद्युत्याय च । नमो वीध्र्याय चात-
प्याय च । नमो वात्याय च रेष्म्याय च । नमो
वास्तव्याय च वास्तुपाय च । नमः सोमाय च
रुद्राय च । नमः ताम्राय चारुणाय च । नमः शङ्गवे
च पशुपतये च । नम उग्राय च भीमाय च । नमो
हन्त्रे च हनीयसे च । नमोऽग्रेवधाय च दूरेवधाय
च । नमो वृक्षेभ्यो हरिकेशेभ्यः ॥ नमस्ताराय ।
नमः शम्भवे च । मयोभवे च । नमः शङ्कराय च ।
मयस्कराय च ॥ [illegible] ॥

नमः शिवाय च शिवतराय च । नमः किंशि-
लाय [illegible] यणाय च । नम इरिण्याय च प्रपथ्याय
च [illegible] पुलस्तिने च कपर्दिने च । नमो गो-

ष्ठ्याय च गृह्याय च । नमः तल्प्याय च गेह्याय च । नमः पार्याय चावार्याय च । नमः प्रतरणाय चोत्तरणाय च । नमस्तीर्थ्याय च कूल्याय च । नमः फेन्याय च शष्प्याय च । नमः सिकत्याय च प्रवाह्याय च । नमो ह्रदव्याय च निवेष्प्याय च । नमः काट्याय च गह्वरेष्ठ्याय[2] च । नमः शुष्क्याय च हरित्याय च । नमो लोप्याय चोलप्याय च । नमः पाँसव्याय च रजस्याय च । नमः सूर्म्याय चोर्म्याय च । नमः पर्णाय च पर्णशादाय च । नम आखिदते च प्रखिदते च । नमोऽभिघ्नते चाक्षुरमाणाय च । नम आखिदाय च विखिदाय च ॥ १५ ॥ ८८ ॥

नमो वः किरिकेभ्यो देवानाँ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षीणकेभ्यो नम आनिर्ह-

१ कू २ ह्य ३ न ऊर्म्याय ४ पर्या ५ क्षिणके

तेभ्यः द्रापे अन्धसस्पते दरिद्र नीललोहित आ-
सां प्रजानामेषां पुरुषाणामेषां पशूनाम् । मा भेर्मा
रोङ्मा नः किञ्चनाममत् ॥ इमा रुद्राय तवसे
कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथा नः
शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्न-
नातुरम् ॥ या ते रुद्र शिवा तनूः शिवा विश्वाहे-
भेषजी । शिवा रुतस्य भेषजी तया नो मृळ जी-
वसे ॥ परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य
दुर्मतेरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व मी-
ढ्वस्तोकाय तनयाय मृळ ॥ मीढुष्टम शिवतम शिवो
नः सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं
वसान उच्चर पिनाकम् । विभ्रदुच्चर विकिरिद
विलोहित नमस्ते अस्तु भगवः ॥ यास्ते सहस्रं
हेतयोऽन्यैमस्मन्निवपन्तु ताः । सहस्रधा सहस्राणि

हेतयस्तव बाह्वोः। तासामीशानो भगवः पराची-
ना मुखा कुरु॥

असङ्ख्याताः सहस्राणि ये रुद्रा अधि भू-
म्याम्। तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि॥
येऽस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि। तेषाँ स०॥
ये नीलग्रीवाः शितिकण्ठा दिवँ रुद्रा उपाश्रिताः।
तेषाँ स०॥ ये नीलग्रीवाः शितिकण्ठाः शर्वा अधः
क्षमाचराः। तेषाँ स०॥ ये वनेषु शष्पिञ्जरा नी-
लग्रीवा विलोहिताः। तेषाँ स०॥ येऽन्नेषु विवि-
ध्यन्ति पात्रेषु पिबतो जनान्। तेषाँ स०॥ ये भू-
तानामधिपतयो विशिखासः कपर्दिनः। तेषाँ स०॥
ये पथीनां पथिरक्षय ऐळमृदा[1] यव्युधः[2]। तेषाँ स०॥
ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः। ते-
षाँ स०॥ य एतावन्तो वा भूयाँसो वा दिशो

---

१ ऐलवृदा (ऐलभृतः) २ युयुधः

रुद्रा वितष्ठिरे । तेषाँ स० ॥ नमो अस्तु रुद्रे-
भ्यो ये दिवि येषां वर्षमिषवः तेभ्यो दश प्राचीर्द-
श दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । ते-
भ्यो नमो अस्तु ते नो मृळयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥
नमो अस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इष-
वः तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीची-
र्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु ते नो
मृळयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां
जम्भे दधामि ॥
नमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशो-
दीचीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु ते नो मृळ-
यन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां ज-

म्भे दधामि ॥ १४८ ॥

तेजोऽसि० ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु। यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः ॥ तर्पणम् मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां विधाय । भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैः ॥ नित्यं दण्डी नित्ययज्ञोपवीती नित्यं ध्याता भस्मना कर्मबन्धी। रुद्रं दृष्ट्वा देवमीशानमुग्रं याति स्थानं तेन साकं तदीयम् ।

अनेन मन्त्रपाठेन (होमेन) आत्मनो वाङ्मनः कायोपार्जितपापानिवारणार्थं। श्रीमहारुद्रदेवता सन्तोषणार्थं। भगवान् अघोरः तत्पुरुषः सद्योजातः वामदेवः असुरबलहः ईशानः बहुरूपः विश्वरूपः त्र्यम्बकः त्रिनेत्रः त्रिशूलहस्तः महामृत्युञ्जयभट्टारकः शतरुद्रेश्वरः वृषभवाहनः सानुचरः सपरिवारः भवो देवः = पार्वतीसहितः परमेश्वरः प्रीयतां प्रीतोऽस्तु ॥

इति रुद्रमन्त्राः

समाप्ताः ॥

१ हाला

॥ ओ३म् ॥

॥ श्री महारुद्राय नमः ॥

॥ शताध्यायमन्त्राः ॥

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तस्स्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् ।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ॥

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं शशिधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे शैलसुतामनोहरतरं वन्दे शिवं शङ्करम् ॥

1 सभाज

यन्मे नरः श्रुत्यं ब्रह्म चक्र । इन्द्राय वृष्णे सुमखाय
मह्यँ सख्ये सखायस्तन्वे तनूभिः ॥ ११ ॥ एवे-
देते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः ।
सञ्चक्ष्या मरुतश्चन्द्रवर्णा अच्छान्त मे छदयाथा च
नूनम् ॥ १२ ॥ को न्वत्र मरुतो मामहे वः प्र
यातन सखीँरच्छा सखायः । मन्मानि चित्रा अपि-
वातयन्त एषां भूत नवेदा म ऋतानाम् ॥ १३ ॥
आ यद्दुवस्याद्दुवसे न कारुरस्माञ्चक्रे मान्यस्य
मेधा । ओ षु वर्त मरुतो विप्रमच्छेमा ब्रह्माणि
जरिता वो अर्चत् ॥ १४ ॥ एष वः स्तोमो म-
रुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः । एषा-
यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम्
॥ १५ ॥ २६ ॥ १०८ ॥

---

१ नः २ [illegible] ३ च्छ ४ साँश्चक्रे ५ त ६ मारुतो ७ ष्ट तन्वो वयं

विवेश ॥ ६ ॥ अहं सुवे पितरमस्य मूर्धन्मम योनिर-
प्स्व१न्तः समुद्रे । ततो वि तिष्ठे भुवनानु विश्वोतामूं
द्यां वर्ष्मणोप स्पृशामि ॥ ७ ॥ अहमेव
वात इव प्र वाम्यारभमाणा भुवनानि विश्वा । परो
दिवा पर एना पृथिव्यैतावती महिना सम्बभूव
॥ ८ ॥ १२ ॥

उद्यद्भानुसहस्रसन्निभमुखीं पीनस्तनीं पद्मगां
दोर्भिरंकुशपाशपुस्तकजपां संबिभ्रतीमादरात् ।
ब्रह्माविष्णुमहेश्वरेन्द्रमुनिभिर्नित्यं स्तुतां वन्दनैः
स्तोत्राद्यैर्भुवनेश्वरीं त्रिनयनां हृत्पङ्कजेऽहं भजे ॥

त्रिलोचनां सूर्यसहस्रशोभां
सिंहासनस्थां द्विभुजां धृतासिम् ।
पीताम्बरां विष्णुविधीशसेव्यां
कामेश्वरीं तां हृदये स्मरामि ॥

इन्द्रं मित्रमिति सप्त (कुत्सो विश्वेदेवा जगती) त्रिष्टुबन्तम् ॥-॥

इन्द्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ १ ॥ त आदित्या आगता सर्वतातये भूत देवा वृत्रतूर्येषु शम्भुवः। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ २ ॥ अवन्तु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ ३ ॥ नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ ४ ॥ बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे। रथं

१ [illegible]दितिसो २ गां व ३ अनाद[illegible] ४ वृहि

न दुर्गाहसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ ५ ॥ इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निवाळे ऋषिरह्वदूतये । रथं न दुर्गाहसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ ६ ॥ ॥ देव्योजपि ॥ देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ७ ॥

संपूर्णेन्दुप्रभाभां सकललिपिमयीं लोलवक्त्रां त्रिनेत्रां शुक्लालङ्कारभूषां शशिमुकुटजटाजूटयुक्तां प्रसन्नाम्। पुष्पस्रक्पूर्णकुम्भं वरमपि दधतीं नीलकण्ठासनस्थां वाग्देवीं सौम्यवक्त्रां कुचभरनमितामम्बिकां तां नमामि ॥

वाणीं पूर्णसुधाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभां
चन्द्रार्धाङ्कितमस्तकां निजकरैः संबिभ्रतीमादरात् ।
वीणामक्षगुणं सुधाढ्यकलशं विद्यां च तुङ्ग-
स्तनीं दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे ॥

इदमपि च ॥ तामग्निवर्णां सौभरिर्दुर्गा त्रिष्टुप् ॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफ-
लेषु जुष्टां । दुर्गां देवीं शरणमहं प्रपद्ये सुत-
रसेतरसे नमः ॥ १ ॥ अग्ने त्वं पारया नव्यो
अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी
बहुला न उर्वी भवा तोकाय तनयाय शं योः
॥ २ ॥ विश्वानि नो दुर्गहा जातवेदः सिन्धुं न
नावा दुरितातिपर्षि । अग्ने अत्रिवन्मनसा गृणानो-
ऽस्माकं बोध्यविता तनूनाम् ॥ ३ ॥ पृतनाजितँ
सहमानमुग्रमग्निँ हुवेम परमात्सधस्थात् । स नः

१ दुर्गाणि [दुर्गहे] २ पृ २ (सिन्धुर्न नावा) सिन्धुंनावा १ बोध्य २ सधस्थात्

परमात्सदस्थात

क्रमीड्यो

क्षामाद्देवो

पर्षदति दुर्गाणि विश्वा क्षामाद्देवो अतिदुरितात्य-
ग्निः ॥ ४ ॥ प्रत्नो हि कमीड्यो अध्वरेषु सना- तू च
च्च होता नव्यश्च सत्सि । स्वां चाग्ने तन्वं
पिप्रायस्वास्मभ्यं च सौभगमा यजस्व ॥ ५ ॥ *
यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद
मन्द्रा । चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः
परमं जगाम ॥ ३ ॥ दैवीं वाचमजनयन्त देवास्तां
विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं
दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥ ७ ॥ पावका नः
सरस्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु
[illegible] ॥ ८ ॥ ॐ गायत्र्यै नमः ॐ भूर्भुवस्स्वः तत्
सवितु० ३ ॥ वेदोऽसि ॥ जातवेदसे सुनवाम सोममरातीयतो
निदहाति वेदः । स नः पर्षदति दुर्गाणि
विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ ॥

[illegible] ३ [illegible] २ देवी ९ पां. ६ [illegible] ऊर्जं ७ [illegible] ([illegible]) [illegible]
[illegible] मयो भूवांतो० [illegible]